6033034 20

1. "विप्राय गां ददाति ।" इति वाक्ये 'विप्राय' पदस्य कः कारकः?

(A) सम्प्रदानम् (B) कर्म (C) करणम् (D) अधिकरणम्

2. मेघदूते 'जलधरः' इति पदस्य अर्थः कः?

(A) मेघः (B) सरोवरः (C) सागरः (D) नदी

3. 'भी' धातोः लट् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) बिभेति (B) भेष्यति (C) भीयते (D) भयते

4. 'वाक् + ईशः' इति पदयोः सन्धिं कृत्वा कः शब्दः भविष्यति?

(A) वागीशः (B) वाचीशः (C) वाक्शीः (D) वाक्ईशः

5. "बालकः पठति ।" इति वाक्ये 'बालकः' पदस्य कः कारकः?

(A) कर्म (B) कर्ता (C) करणम् (D) सम्प्रदानम्

6. 'नवरात्रम्' इति पदे कः समासः?

(A) कर्मधारयः (B) बहुव्रीहिः (C) अव्ययीभावः (D) द्विगुः

7. '20' इत्यस्य संस्कृतपदं किम्?

(A) विंशतिः (B) त्रिंशत् (C) दश (D) चत्वारिंशत्

8. 'शुश्रूषस्व गुरून्' इति उपदेशः चतुर्थाङ्के केन दत्तः?

(A) कण्वेन (B) गौतम्या (C) शार्ङ्गरवेण (D) दुर्वाससा

9. किरातार्जुनीयस्य प्रथमं पदं किम्?

(A) अथ (B) श्रियः (C) कुरुप्रवीरम् (D) विविल्सुः

10. "रामः गृहं गच्छति। सीता पाठं पठति।" इत्यनयोः वाक्ययोः संयुक्तवाक्यम् किम्?

(A) रामः गृहं गच्छति सीता च पाठं पठति

(B) रामः गृहं गच्छति परं सीता पाठं पठति

(C) यदा रामः गच्छति तदा सीता पठति

(D) रामः गच्छति इति सीता पठति

11. अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के शकुन्तलायाः कः प्रमुखः गुणः प्रकटितः?

(A) क्रोधः (B) प्रकृतिप्रेम (C) उद्दण्डता (D) लोभः

12. 'सूर्यः + उदयः' इत्यस्य सन्धौ विसर्गस्य गुणसन्धेश्च प्रयोगेन कः शब्दः भवति?

(A) सूरयुदयः (B) सूर्योदय (C) सूर्योदयः (D) सूर्युदयः

13. निम्नलिखितेषु शुद्धं सन्धिरूपं किम्?

(A) तत् + जय = तत्जयः (B) तत् + जय = तच्जयः (C) तत् + जय = तद्जयः (D) तत् + जय = तज्जयः

14. "विद्या नाम नरस्य रूपमधिकम्" इति सूक्तेः अग्रिमं चरणं किम्?

(A) शीलं सदा वर्धते (B) प्रच्छन्नगुप्तं धनम् (C) ज्ञानं परं भूषणम् (D) नित्यं सेव्यः सतां सङ्गः

15. "वय संस्कृतं पठामः।" इत्यस्य हिन्दी-अनुवादः कः?

(A) हम संस्कृत पढ़ते हैं (B) वह संस्कृत पढ़ता है (C) तुम संस्कृत पढ़ते हो (D) मैं संस्कृत पढ़ता हूँ

16. चतुर्थाङ्के 'पल्लव' इति पदस्य अर्थः कः?

(A) मूलम् (B) काण्डः (C) नवपत्रम् (D) फलम्

17. उत्तररामचरितस्य तृतीयाङ्के 'पञ्चवटी' इति पदस्य अर्थः कः?

(A) पञ्चपर्वतानां समूहः (B) पञ्चमुखशिवालयः (C) पञ्चवटवृक्षयुक्तं स्थानम् (D) पञ्चनद्याः सङ्गमः

18. 'महा + औषधि' इति पदयोः सन्धिं कृत्वा कः शब्दः भविष्यति?

(A) महार्षधिः (B) महोयौषधिः (C) महौषधिः (D) महोषधिः

19. 'कश्चित्कान्ताविरहगुरुणा' इति पद्यांशः कस्य ग्रन्थस्य प्रथमपंक्तौ अस्ति?

(A) कुमारसम्भवस्य (B) रघुवंशस्य (C) ऋतुसंहारस्य (D) मेघदूतस्य

20. 'नीलोत्पलम्' इति पदे कः समासः?

(A) द्वन्द्वः (B) कर्मधारयः (C) बहुव्रीहिः (D) अव्ययीभावः

21. "छात्रः पुस्तकं पठति।" इति वाक्ये 'पुस्तकम्' पदस्य का विभक्तिः?

(A) द्वितीया (B) तृतीया (C) चतुर्थी (D) प्रथमा

22. 'हल्' इति प्रत्याहारेण कानि वर्णानि ग्राह्याणी?

(A) सर्वे स्वराः (B) केवलं ऊष्माणः (C) केवलं अनुनासिकाः (D) सर्वाणि व्यञ्जनानि

23. 'हरि' शब्दस्य चतुर्थी एकवचने रूपं किम्?

(A) हरिणा (B) हरये (C) हरेः (D) हरौ

24. आधुनिकशिक्षणदृष्ट्या व्याकरणशिक्षणस्य सर्वोत्तमा विधिः का?

(A) केवलं पुस्तकपठनम्

(B) केवलं सूत्रकण्ठस्थीकरणम्

(C) केवलं लिखितपरीक्षणम्

(D) उदाहरणसहितं नियमप्रतिपादनम्

25. उत्तररामचरितस्य तृतीयाङ्के 'एको रसः करुण एव निमित्तभेदात्' इति प्रसिद्धसूक्तेः कः भावः व्यक्तः?

(A) स्नेहः सर्वदा हास्यस्य कारणं भवति

(B) विभिन्नपरिस्थितिषु स्नेह एव करुणरसस्य कारणं भवति

(C) स्नेहस्य नाटके महत्त्वं नास्ति

(D) करुणरसः केवलं युद्धेन उत्पद्यते

26. "द्वैतवने युधिष्ठिरं समाययौ।" इति वाक्ये 'द्वैतवने' इति पदे का विभक्तिः?

(A) पञ्चमी (B) तृतीया (C) द्वितीया (D) सप्तमी

603303420

27. किरातार्जुनीयस्य प्रथमसर्गे प्रयुक्तस्य 'वनेचर' इति पदस्य सामान्यः अर्थः कः?

(A) पर्वतः (B) वने विचरणकर्ता (C) योद्धा (D) नदी

28. निम्नलिखितेषु शुद्धरूपं किम्?

(A) विद्या + अर्थी = विद्यअर्थी
(B) विद्या + अर्थी = विद्यार्थी
(C) विद्या + अर्थी = विद्यैर्थी
(D) विद्या + अर्थी = विद्योर्थी

29. 'पाणिपादम्' इति पदस्य विग्रहः कः?

(A) पाणिनो पादः (B) पाणी च पादौ च एतेषां समाहारः (C) पादयोः पाणी (D) पाण्योः पादौ

30. नीतिशतके विदुषां प्रमुखः गुणः कः प्रतिपादितः?

(A) आलस्यम् (B) विनयः (C) दारिद्र्यम् (D) अहङ्कारः

31. संस्कृतकक्षां रोचकां कर्तुं किं सर्वोत्तमं साधनम्?

(A) केवलं लिखितकार्यम्
(B) केवलं व्याख्यानम्
(C) केवलं कण्ठस्थीकरणम्
(D) श्रव्यदृश्यनाट्यप्रयोगः

32. 'लभ्' धातोः लृट् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) अलभत (B) लभेत (C) लभते (D) लप्स्यते

33. 'विद्यालय' इति पदे कः सन्धिविशेषः अस्ति?

(A) वृद्धिः (B) गुणः (C) दीर्घः (D) यण्

34. "ऐश्वर्यमदपिशाचेन गृहीतानां ___ नाम भेषजमस्ति।" रिक्तस्थानं पूरयत।

(A) दानधर्मः (B) तपोबलम् (C) तीर्थाटनम् (D) शास्त्रश्रवणम्

603303420

35. निम्नलिखितेषु कः शुद्धवाक्यः?

(A) मम संस्कृते पठामि (B) अहं संस्कृते पठामि (C) अहं संस्कृते पठति (D) अहम् संस्कृताय पठामि

36. 'पा' (पिबति) धातोः विधिलिङ् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) अपिबत् (B) पिबेत् (C) पिबतु (D) पिबति

37. 'पीताम्बरः' इति पदे कः समासः?

(A) बहुव्रीहिः (B) कर्मधारयः (C) तत्पुरुषः (D) द्वन्द्वः

38. "वृक्षात् पत्रं पतति ।" इति वाक्ये 'वृक्षात्' पदस्य कः कारकः?

(A) अधिकरणम् (B) अपादानम् (C) कर्म (D) सम्प्रदानम्

39. '10' इत्यस्य संस्कृतपदं किम्?

(A) शत (B) पञ्च (C) सप्त (D) दश

40. 'ब्रू' धातोः परस्मैपदे लट् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) ब्रूते (B) अब्रवीत् (C) ब्रुवते (D) ब्रवीति

41. प्रश्नोत्तरविधेः मुख्यः लाभः कः?

(A) कालस्य न्यूनता (B) सक्रियभागिताविकासः (C) केवलं स्मरणम् (D) शिक्षकस्य एकाधिकारः

42. 'मातापितरौ' इति पदे कः समासः?

(A) अव्ययीभावः (B) कर्मधारयः (C) तत्पुरुषः (D) द्वन्द्वः

43. नीतिशतके प्रयुक्तस्य 'मूर्ख' इति पदस्य कः पर्यायः?

(A) सज्जनः (B) अबुधः (C) विद्वान् (D) तपस्वी

6033003420

44. उत्तररामचरिते करुणरसस्य प्रधानं कारणं किम्?

(A) लक्ष्मणमूर्च्छा (B) दशरथमरणम् (C) सीतायाः परित्यागः (D) रामस्य वनगमनम्

45. 'पञ्चवटी' इति पदस्य पारम्परिकव्याकरणदृष्ट्या कः समासः?

(A) द्वन्द्वः (B) तत्पुरुषः (C) द्विगुः (D) बहुव्रीहिः

46. 'इदम्' शब्दस्य पुल्लिङ्ग प्रथमा एकवचने रूपं किम्?

(A) अयम् (B) इमे (C) एते (D) इमम्

47. 'लता' शब्दस्य प्रथमा-द्वितीया बहुवचने रूपं किम्?

(A) लतायाम् (B) लताम् (C) लताः (D) लते

48. 'कुरुप्रवीर' इति पदस्य समासविग्रहः कः?

(A) कुरुरहितः प्रवीरः (B) कुरुश्च प्रवीरश्च (C) कुरूणां प्रवीरः (D) कुरुसमः प्रवीरः

49. "पातुं न प्रथमं व्यवस्यति जलं" — इति श्लोकः कस्य विषये अस्ति?

(A) वनलतायाः (B) अनसूयायाः (C) प्रियंवदायाः (D) शकुन्तलायाः

50. निम्नलिखितेषु कः कर्मधारय-समासः?

(A) उपकूलम् (B) दशाननः (C) महावीरः (D) रामलक्ष्मणौ

51. शुकनासोपदेशे 'श्री' इति शब्दस्य उचितः पर्यायः कः?

(A) शक्तिः (B) लक्ष्मीः (C) कीर्तिः (D) विद्या

52. "छात्रः ---------- पठति।" रिक्तस्थानं उचितरूपेण पूरयत।

(A) पुस्तकात् (B) पुस्तकाय (C) पुस्तकेन (D) पुस्तकम्

53. अनुवादशिक्षणस्य मुख्यतमं शैक्षिकप्रयोजनं किम्?

(A) केवलं लेखनकौशलम्
(B) भाषासंरचनायाः बोधविकासः
(C) केवलं कोषप्रयोगः
(D) केवलं व्याकरणस्मरणम्

54. 'राजपुत्रः' इति पदे कः तत्पुरुषभेदः?

(A) षष्ठीतत्पुरुषः
(B) चतुर्थीतत्पुरुषः
(C) सप्तमीतत्पुरुषः
(D) द्वितीयातत्पुरुषः

55. भवभूतेः प्रसिद्धानि नाटकानि कति सन्ति ?

(A) पञ्च
(B) चत्वारि
(C) त्रीणि
(D) द्वे

56. 'पठ्' धातोः लोट् लकारे मध्यमपुरुष-एकवचने रूपं किम्?

(A) अपठत्
(B) पठ
(C) पठति
(D) पठिष्यति

57. 'गुरु' शब्दस्य षष्ठी एकवचने रूपं किम्?

(A) गुरोः
(B) गुरौ
(C) गुरुणा
(D) गुरवे

58. 'सत् + चित्' इति पदयोः सन्धिं कृत्वा किं रूपं भवति?

(A) सच्चित्
(B) सदचित्
(C) सत्चित्
(D) सच्छित्

59. 'रामः + गच्छति' इत्यनयोः सन्धिं कृत्वा शुद्धं रूपं किम् भवति?

(A) रामो गच्छति
(B) रामा गच्छति
(C) रामः गच्छति
(D) रामगच्छति

60. 'समाययौ' इति क्रियापदस्य धातुः लकारश्च कौ?

(A) या धातुः लिट् लकारः
(B) यम् धातुः लङ् लकारः
(C) या धातुः लट् लकारः
(D) आ धातुः लोट् लकारः

61. 'रामः एव गिरिः' इति विग्रहस्य समासः कः?

(A) द्वन्द्वः
(B) बहुव्रीहिः
(C) कर्मधारयः
(D) अव्ययीभावः

6033303420

62. मेघदूतम् कस्मिन् छन्दसि रचितम्?

(A) वसन्ततिलकायाम् (B) शिखरिण्याम् (C) अनुष्टुभि (D) मन्दाक्रान्तायाम्

63. परम्परागतपाठयोजनायाः आरम्भे कतमं सोपानं प्रथमं भवति?

(A) प्रस्तावना (B) पुनरावृत्तिः (C) गृहकार्यम् (D) मूल्याङ्कनम्

64. शिवराजविजये 'म्लेच्छ' शब्दः कस्य सन्दर्भे प्रयुक्तः?

(A) विदेशीशत्रुः (B) तपस्वी (C) विद्वान् (D) क्षत्रियः

65. नीतिशतके भर्तृहरिणा मानवोन्नतौ कस्य सर्वाधिकः नैतिकः प्रभावः प्रतिपादितः?

(A) दुर्जनसङ्गः (B) सत्सङ्गः (C) लोभः (D) आलस्यम्

66. छात्रकेन्द्रितशिक्षणस्य मुख्यः आधारः कः?

(A) शिक्षकस्य प्राधान्यम् (B) केवलं पाठ्यपुस्तकम् (C) छात्रानुभवप्राधान्यम् (D) केवलं परीक्षाफलम्

67. 'शुश्रूषस्व' इति पदस्य लकारः कः?

(A) लोट् (B) लङ् (C) लट् (D) लृट्

68. 'ग्रामगतः' इति पदस्य द्वितीयातत्पुरुषदृष्ट्या विग्रहः कः?

(A) ग्रामस्य गतः (B) ग्रामे गतः (C) ग्रामाय गतः (D) ग्राम गतः

69. शिवराजविजयस्य प्रथमनिःश्वासे मुख्यतया कस्य दुर्गस्य वर्णनम् अस्ति?

(A) रायगडदुर्गस्य (B) चित्रकूटदुर्गस्य (C) आग्रादुर्गस्य (D) ग्वालियरदुर्गस्य

70. 'त्रिलोचन' इति पदे कः समासः?

(A) द्विगुः (B) कर्मधारयः (C) द्वन्द्वः (D) बहुव्रीहिः

71. "------ बालकः पठति?" रिक्तस्थाने उचितं प्रश्नवाचकसर्वनामपदं चिनुत।

(A) कः (B) का (C) के (D) किम्

72. 'चन्द्रशेखरः' इति पदस्य विग्रहः कः?

(A) चन्द्रः शेखरे यस्य सः (B) चन्द्र इव शेखरः (C) चन्द्रस्य शेखरः (D) चन्द्रश्च शेखरश्च

73. "रामः बाणेन रावणं हन्ति।" इति वाक्ये 'बाणेन' पदस्य कः कारकः?

(A) कर्ता (B) अपादानम् (C) कर्म (D) करणम्

74. निम्नलिखितेषु 'बालक' शब्दस्य तृतीया एकवचनरूपं किम्?

(A) बालकेन (B) बालकात् (C) बालकाय (D) बालकस्य

75. "सत्यमेव जयते --------।" रिक्तस्थानं पूरयत।

(A) धर्मम् (B) सर्वम् (C) नित्यम् (D) नानृतम्

76. भारविकृतस्य 'किरातार्जुनीयस्य' काव्यस्य कति सर्गाः सन्ति?

(A) सप्तदश (B) विंशतिः (C) अष्टादश (D) पञ्चदश

77. 'मनोरथः' इति पदस्य प्रातिपदिकदृष्ट्या सन्धिविच्छेदः कः?

(A) मनो + रथः (B) मनः + अरथः (C) मन + रथः (D) मनस् + रथः

78. 'राम' शब्दस्य प्रथमा बहुवचने रूपं किम्?

(A) रामम् (B) रामः (C) रामाः (D) रामौ

79. 'सर्व' शब्दस्य पुल्लिङ्ग प्रथमा बहुवचने रूपं किम्?

(A) सर्वौ (B) सर्वः (C) सर्वान् (D) सर्वे

80. 'गम्' धातोः लङ् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) अगच्छत्  (B) गच्छति  (C) गमिष्यति  (D) गच्छतु

81. आगमनविधौ ज्ञानप्राप्तेः शिक्षणक्रमः कः भवति?

(A) परिभाषातः व्याख्यां प्रति  (B) उदाहरणात् नियमं प्रति

(C) सिद्धान्तात् प्रयोगं प्रति  (D) नियमात् उदाहरणं प्रति

82. कालिदासस्य कस्य गुणस्य प्रसिद्धिः अधिका?

(A) उपमायाः  (B) पदलालित्यस्य  (C) श्लेषस्य  (D) अर्थगौरवस्य

83. "शुकनासः चन्द्रापीडम् उपदिशति।" वाक्ये 'चन्द्रापीडम्' इति पदे कः कारकः?

(A) कर्ता  (B) कर्म  (C) सम्प्रदानम्  (D) करणम्

84. 'विद्यार्थी पुस्तक पढ़ता है।' इत्यस्य संस्कृत-अनुवादः कः?

(A) छात्रः पुस्तकेन पठति  (B) छात्रः पुस्तकाय पठति

(C) छात्रः पुस्तकं पठति  (D) छात्राणि पुस्तकं पठन्ति

85. शुकनासोपदेशे प्रयुक्तस्य 'अविनय' इति शब्दस्य अर्थः कः?

(A) विनम्रता  (B) दारिद्र्यम्  (C) उद्दण्डता  (D) विद्वत्ता

86. 'रामः + इव' इत्यनयोः व्याकरणनियमानुसारं शुद्धं रूपं किम्?

(A) रामइव  (B) रामायिव  (C) राम इव  (D) रामोव

87. 'मूर्खपद्धतिः' इति पदे कः समासः?

(A) अव्ययीभावः  (B) बहुव्रीहिः  (C) षष्ठीतत्पुरुषः  (D) द्वन्द्वः

88. बाणभट्टस्य गद्यशैल्याः प्रमुखं लक्षणं किम्?

(A) एकपदप्रयोगः (B) संक्षिप्ततायाः (C) लोकभाषामिश्रणम् (D) दीर्घसमासप्रयोगः

89. 'राजलक्ष्मी' इति पदे कः समासः?

(A) षष्ठीतत्पुरुषः (B) अव्ययीभावः (C) बहुव्रीहिः (D) द्वन्द्वः

90. "बालकाः पठति ।" वाक्ये क्रियापदस्य शुद्धरूपं किम्?

(A) पठन्ति (B) पठति (C) पठसि (D) पठतः

91. "---------- छात्राः पठन्ति ।" पञ्चसंख्यां बोधयितुं रिक्तस्थानं पूरयत ।

(A) पञ्चम (B) पञ्च (C) पञ्चभिः (D) पञ्चानाम्

92. "अहिंसा परमो धर्मः ।" इति सुभाषितस्य अर्थः कः?

(A) सत्यम् एव धर्मः (B) तपः एव धर्मः (C) दानम् एव धर्मः (D) अहिंसा एव सर्वोत्तमः धर्मः

93. 'नदी' शब्दस्य सप्तमी एकवचने रूपं किम्?

(A) नद्याम् (B) नद्यै (C) नद्याः (D) नदीम्

94. अम्बिकादत्तव्यासः कस्य युगस्य संस्कृतसाहित्यकारः आसीत्?

(A) आधुनिकयुगस्य (B) वैदिकयुगस्य (C) मध्ययुगस्य (D) प्राचीनयुगस्य

95. 'दा' धातोः लट् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) दत्ते (B) ददति (C) दास्यति (D) ददाति

96. 'अस्मद्' शब्दस्य षष्ठी एकवचने रूपं किम्?

(A) मम (B) मया (C) माम् (D) मह्यम्

97. 'युष्मद्' शब्दस्य चतुर्थी एकवचने रूपं किम्?

(A) त्वया (B) तुभ्यम् (C) तव (D) त्वाम्

98. 'पतिगृहम्' इति पदे कः समासः?

(A) षष्ठीतत्पुरुषः (B) द्वन्द्वः (C) अव्ययीभावः (D) बहुव्रीहिः

99. मेघदूते यक्षस्य विरहावस्थायाः प्रमुखं कारणं किम्?

(A) कुबेरशापः (B) दारिद्र्यम् (C) युद्धपराजयः (D) तपोभङ्गः

100. उत्तररामचरितस्य तृतीयाङ्के रामस्य का प्रमुखा मनोवेदना चित्रिता?

(A) विरहवेदना (B) क्रोधः (C) उत्साहः (D) भयम्

101. पद्यव्याख्यायां "अन्वयः" इति पदस्य अर्थः कः?

(A) पदानां गद्यक्रमे पुनर्व्यवस्थापनम्
(B) श्लोकस्य सस्वरवाचनम्
(C) श्लोकस्य कण्ठस्थीकरणम्
(D) श्लोकस्य छन्दः

102. 'यक्षश्चक्रे' इत्यत्र 'यक्षः + चक्रे' इत्यनयोः कः सन्धिः?

(A) दीर्घसन्धिः (B) यणसन्धिः (C) गुणसन्धिः (D) विसर्गसन्धिः

103. "गुरून् शुश्रूषस्व" इति वाक्ये 'गुरून्' इति पदं कस्यां विभक्तौ अस्ति?

(A) सप्तमी (B) चतुर्थी (C) प्रथमा (D) द्वितीया

104. अभिज्ञानशाकुन्तले दुष्यन्तः कस्य वंशस्य राजा आसीत्?

(A) यदुवंशस्य (B) पुरुवंशस्य (C) नन्दवंशस्य (D) इक्ष्वाकुवंशस्य

105. 'यथाशक्ति' इति पदे कः समासः?

(A) अव्ययीभावः (B) तत्पुरुषः (C) द्वन्द्वः (D) बहुव्रीहिः

106. संस्कृतगद्यशिक्षणे परम्परागततया सर्वाधिकप्रयुक्ता शिक्षणपद्धतिः का?

(A) स्वाध्यायपद्धतिः (B) व्याख्यापद्धतिः (C) अनुकरणपद्धतिः (D) प्रत्यक्षपद्धतिः

107. "रामः पुस्तकं पठति।" इत्यस्य कर्मवाच्यरूपं किम्?

(A) रामेण पुस्तकं पठ्यते (B) रामात् पुस्तकं पठ्यते (C) रामस्य पुस्तकं पठ्यते (D) रामः पुस्तकेन पठ्यते

108. परम्परागतसंस्कृतपद्यशिक्षणे अध्यापनक्रियायाः प्रथमः चरणः कः?

(A) व्याकरणविश्लेषणम् (B) सस्वरवाचनम् (C) अनुवादः (D) मूल्याङ्कनम्

109. पाणिनीयव्याकरणे 'अच्' इति प्रत्याहारः कान् वर्णान् ग्रहीष्यति?

(A) विसर्गान् (B) स्वरान् (C) व्यञ्जनानि (D) अनुस्वारान्

110. शिवराजविजयम् ग्रन्थस्य मूलविषयः कः?

(A) नलदमयन्तीकथा (B) शिवाजेः राज्यसंरक्षणसंघर्षः (C) रामकथा (D) आख्यायिकात्मकं प्रेम

111. 'उपगङ्गम्' इति पदस्य समासविग्रहः कः?

(A) गङ्गायाः दूरे (B) गङ्गायाः उपरि (C) गङ्गायाः समीपे (D) गङ्गायाः अधः

112. 'पितृ' शब्दस्य प्रथमा एकवचने रूपं किम्?

(A) पितरः (B) पिता (C) पितरौ (D) पित्रे

113. 'नरेन्द्र' इति पदस्य सन्धिविच्छेदः कः?

(A) नर + एन्द्र (B) नरि + इन्द्र (C) नरे + इन्द्र (D) नर + इन्द्र

114. भर्तृहरिकृतानि शतकत्रयाणि कानि?

(A) नीति, धर्म, मोक्षः (B) नीति, शृङ्गार, वैराग्यम्

(C) नीति, सुभाषित, स्तोत्रम् (D) नीति, राज, धर्मः

115. "सहसा विदधीत न क्रियाम्" इति सूक्तिः कस्य ग्रन्थस्य?

(A) नैषधीयचरितस्य (B) कादम्बर्याः (C) शिशुपालवधस्य (D) किरातार्जुनीयस्य

116. 'फलानि ------ सन्ति।' रिक्तस्थानं पूरयत।

(A) मधुरम् (B) मधुराणि (C) मधुरौ (D) मधुराः

117. 'फल' शब्दस्य प्रथमा द्विवचने रूपं किम्?

(A) फलानि (B) फलाः (C) फलम् (D) फले

118. 'शिवराजविजयः' इति पदस्य समासविग्रहः कः?

(A) शिवः च राजः च (B) शिव एव राजः (C) शिवराजस्य विजयः (D) शिवराज इव विजयः

119. शुकनासोपदेशानुसारं लक्ष्मीः केषु अधिकान् दोषान् जनयति?

(A) तरुणराजपुत्रेषु (B) गृहस्थव्यापारिषु (C) दरिद्रविप्रेषु (D) वृद्धतपस्विषु

120. "वक्त्रं पूर्णशशीव शोभते।" अत्र कः अलङ्कारः?

(A) अनुप्रासः (B) रूपकम् (C) उपमा (D) उत्प्रेक्षा

121. भारविकृतस्य 'किरातार्जुनीयस्य' कथावस्तु कस्मात् ग्रन्थात् गृहीता?

(A) रामायणात् (B) महाभारतात् (C) भागवतात् (D) विष्णुपुराणात्

122. कालिदासकृतं नाटकं किम्?

(A) मृच्छकटिकम् (B) मुद्राराक्षसम् (C) उत्तररामचरितम् (D) मालविकाग्निमित्रम्

123. 'भू' धातोः लट् लकारे प्रथमपुरुष-एकवचने रूपं किम्?

(A) भवसि (B) भवति (C) भवन्ति (D) भवामि

124. "बालकः विद्यालयः गच्छति।" वाक्ये अशुद्धिं संशोधयत।

(A) बालकेन (B) गच्छन्ति (C) विद्यालयम् (D) विद्यालये

125. अभिज्ञानशाकुन्तले प्रधानरसः कः?

(A) हास्यः (B) शृङ्गारः (C) वीरः (D) शान्तः

603303420